भुक्त्वा न शोचेन्मरणं महात्मा
मोक्षे मतिञ्चाहमतोऽभिधास्ये ॥"
इति मात्स्ये वृषभलक्षणं नाम १८१ अध्यायः ॥
जलपानार्थमागतवृषस्य निवारणे दोषो यथा,
"गवां तृष्णाभिभूतानां पानार्थमभिधावताम् ।
अन्तरायो भवेद्यस्तु स भवेद्ब्रह्मघातकः ॥"
इति कर्म्मलोचनम् ॥ * ॥
अस्य दानविधिर्यथा,—
वशिष्ठ उवाच ।
"यदीश्वरो दरिद्रो वा करोति विधिना नृप ।
दानं सर्व्वगुणोपेतं तच्छृणुष्व यथातथम् ॥
भारादिस्त्रिपलान्तश्च वृषं कृत्वा विधानतः ।
युतं धेन्वाथवा दद्याच्छक्तितो नृपसत्तम ॥
यन्मया धेनवः प्रोक्ता वृषास्तावन्त एव हि ।
द्वरावेते नियोक्तव्याः खुर्द्दराय च तथा वृषाः ॥
सर्व्वाभावात्ततो राजन् तिलपात्राणि नित्यशः ।
सर्व्वपापविनाशाय दीयन्ते नृपसत्तम ॥
गोमयेन समालिप्य यववस्त्रसमावृते ।
वृषं हेममयं तत्र रौप्यं वा रत्नसंयुतम् ॥
तस्य नीलमयैः शृङ्गैर्मौक्तिकाश्चिणयो रदाः ।
दात्रिंशच्छुभवर्णाणि विद्रुमौष्ठौ सुनासिका ॥
मारकतौ विनिर्द्दिष्टा कर्णौ चैवासकौ मतौ ।
पद्मरागस्य वै पादाः खुरा रौप्यमयास्तथा ॥
राजतान्यस्य रोमाणि चौमवस्त्रेण कम्बलम् ।
पट्टेन पुच्छमुद्दिष्टं सर्व्वेषामप्ययं विधिः ॥
वृषणौ स्फटिकस्यापि लिङ्गे मणिः प्रकीर्त्तितः ।
यथा धेनुस्तथानड्वान् सुवर्णस्य तु कारयेत् ॥
सर्व्वासां फलमाप्नोति धेनूनां वृषभप्रदः ।
दाता स विभवाद्दानं भक्त्या यः प्रतिपादयेत् ॥
वृषभस्याप्यशक्तौ हि तदनन्तफलं स्मृतम् ।
निःस्वो वाप्येवमेवं हि कृत्वा व्रतमतन्द्रितः ।
तत्फलं समवाप्नोति स्वल्पदानान्न संशयः ॥"
इति वह्निपुराणे वृषदानाध्यायः ॥ * ॥
तद्दानफलं यथा,—
"कन्यादानं वृषोत्सर्गं तीर्थसेवां श्रुतं तथा ।
ये कुर्व्वन्ति गृहस्थास्तु न वै तद्विषयोपगाः ॥"
इति तत्रैव कन्यादाननामाध्यायः ॥ * ॥
अपि च ।
ब्रह्मोवाच ।
"वृषगावौ समादाय युवानौ लक्षणान्वितौ ।
हेमशृङ्गौ शफे रौप्ये सवस्त्रौ पूजयेन्मुने ! ॥
शिवोमां पूजयित्वा तु तद्दिने यः प्रयच्छति ।
शिवभक्ताय विप्राय रोहिण्यां वा स्वगेहे वा ॥
न वियोगो भवेत्तस्य स्तलपक्षीपतेः क्वतः ।
यातरंहसवैमानैर्गच्छेच्छिवपुरं द्विज ॥
तत्र भोगांश्चिरं भुक्त्वा इह आगत्य जायते ।
सम्हृष्टो धनधान्याभ्यां पुत्त्रमित्त्रसमाकुलः ॥
यो वा रत्नसमायुक्तं गोयुगं पूजयेन्मुने ।
प्रयच्छति शिवोमा च प्रीयेतां भावितात्मनः ॥
स सर्व्वपापदुःखाभ्यां विमुक्तः क्रीडते सदा ।
इह लोके भवेद्धन्यो देहान्ते परमं पदम् ॥"
इति देवीपुराणे गोरत्नव्रतनामाध्यायः ॥ * ॥

शिववृषकारणं यथा,—
श्रीकृष्ण उवाच ।
"अथ गर्व्वान्वितो रुद्रो हन्तुं त्रिपुरसुल्वणम् ।
मत्वा मनसि संहर्त्ता सर्व्वेषां जगतामिति ।
कोऽयं पतङ्गवद्दैत्य इति मत्वा ययौ रणम् ।
विहाय शूलं मद्दत्तं मदीयं कवचं परम् ॥
चिरं बभूव समरं वर्षमेकं दिवानिशम् ।
न कोऽपि जेतुं कं शक्तो द्वौ समौ समरे
सदा ॥
पृथिव्याश्च रथं कृत्वा दैत्येन्द्रो मायया प्रिये ।
अत्यूर्द्ध्वं समुत्तस्थौ पञ्चाशत्कोटियोजनम् ॥
उत्तस्थौ शङ्करस्तूर्णं हन्तुं दैत्यं जगत्प्रभुः ।
जघान मुष्टिना रुद्रो दानवेन्द्रं प्रकोपतः ॥
वज्रमुष्टिप्रहारेण सद्यो मूर्च्छामवाप सः ।
क्षणेन चेतनां प्राप्य कोपाद्दानवपुङ्गवः ।
शिवं सयानमुत्तोल्य पातयामास भूतले ॥
तदाहं कलया शीघ्रं वृषरूपं विधाय च ।
सयानं शङ्करं धृत्वा विषाणाभ्यामुदक्रमम् ।
ददौ तस्मै स्वकवचं स्वशूलमरिमर्द्दनम् ॥
मया दत्तेन शूलेन जघान त्रिपुरं हरः ।
मामेव दर्पहन्तारं तुष्टाव व्रीडितः पुनः ॥
तत्याज शङ्करो दर्पं विप्रबीजं ततो विभुः ।
ज्ञानानन्दस्वरूपश्च निर्लिप्तः सर्व्वकर्म्मसु ॥
ततोऽहं वृषरूपेण वहामि तेन तं प्रियम् ।
मम प्रियतमो नास्ति त्रैलोक्येषु शिवात् परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३६ अध्यायः ॥
मेषादिद्वादशराश्यन्तर्गतद्वितीयराशिः । तत्प-
र्य्यायः । तावुरिः २ । अस्य विशेषसंज्ञा ।
सौम्यः । अङ्गना । युग्मम् । समः । स्थिरः ।
पृष्ठरः । अयं चतुष्पात् । निशासु ग्राम्यः ।
दिवा वन्यः । ह्रस्वाख्यः । दक्षिणदिक्पतिः ।
निशाख्यः । पृष्ठोदयाख्यः । अस्याधिस्वामी देवता
वृषः । कृत्तिकापादत्रयरोहिणीसमुदायमृगशि-
रोऽर्द्धेनैतद्राशिर्भवति । स च शीलस्वभावः ।
सुन्दरभूमिस्वामी । वातप्रकृतिः । श्वेतवर्णः ।
वैश्यजातिः । महाशब्दकरः । मध्यमस्त्रीसङ्गः ।
मध्यमसन्तानश्च । एतद्राशिजात एतादृग्-
भवति । दाता । वाग्दुःखरः । निर्भयः । पर-
दाराभिलाषी । इति वृहज्जातकादयः ॥ * ॥
एतद्राशिजातफलम् ।
"स्थिरमतिं सुमतिं कमनीयतां
कृशकतां हि सुखासुपभोगताम् ।
वृषगतो हिमगुर्भ्रमशादिशेत्
सुललितः ललितञ्च सुखान्यपि ॥" * ॥
तल्लग्नजातफलम् ।
"वृषलग्ने भवेज्जातो गुरुभक्तः प्रियंवदः ।
गुणी कृती धनी लुब्धः शूरः सर्व्वजनप्रियः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
चतुर्व्विधपुरुषमध्ये पुरुषविशेषः । (यथा,—
"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
शशो मृगो वृषोऽश्वश्च स्त्रीपुंसोर्जातिलक्षणम् ॥"
इति रतिमञ्जरी ।)

तस्य लक्षणं यथा,—
"बहुगुणबहुवन्धः शीघ्रकामी नताङ्गः
सकलरुचिरदेहः सत्यवादी वृषोऽयम् ॥"
इति च रतिमञ्जरी ॥ * ॥
एकादशमन्वन्तरीयेन्द्रः । यथा,—
"रुद्रपुत्त्रस्य ते पुत्त्रान् वक्ष्याम्येकादशस्य तु ।
सर्व्वत्रगः सुशर्म्मा च देवानीकः पुरुर्गुरुः ॥
च्रत्रवद्धा दृढ़ायुश्च आर्द्रकः पुत्रकस्तथा ।
विहङ्गमाः कामगमा निर्म्माणरुचयस्तथा ॥
एकैकस्त्रिंशकस्तेषां गणाश्चेन्द्रश्च वै वृषः ।
दशग्रीवो रिपुस्तस्य स्त्रीरूपी घातयिष्यति ॥"
इति गारुड़े ८७ अध्यायः ॥
(कामान् वर्षतीति । वृष + कः ।) धर्म्मः ।
(यथा, मनुः । ८ । १६ ।
"वृषो हि भगवान् धर्म्मस्तस्य यः कुरुते ह्यलम् ।
वृषलं तं विदुर्द्देवास्तस्माद्धर्म्मं न लोपयेत् ॥")
शृङ्गी । उत्तरपदस्थश्चेत् श्रेष्ठः । (यथा, हरि-
वंशे । १४१ । ३८ ।
"शारदं वर्षणं यद्वत् महेष्वासो गवांपतिः ।
तद्वद्यदुवृषः सेहे बाणवर्षमरिन्दमः ॥")
मूषिकः । शुक्रलः । वास्तुस्थानभेदः । इति
मेदिनी ॥ वासकः । इति विश्वः ॥ श्रीकृष्णः ।
इति त्रिकाण्डशेषः ॥ शत्रुः । इति जटाधरः ॥
कामः । बलवान् । इत्यनेकार्थकोषः ॥ ऋषभ-
नामौषधम् । इति राजनिर्घण्टः ॥ (पतिः ।
यथा, काशीखण्डे ।
"स्ववृषं या परित्यज्य परवृषे वृषायते ।
वृषली सा हि विज्ञेया न शूद्रो वृषली भवेत् ॥")
वृषकर्णी, स्त्री, सुदर्शना । इति रत्नमाला ॥
सुदर्शनगुलञ्च इति भाषा ॥
वृषगन्धा, स्त्री, (वृषस्य गन्धो यस्याः ।) वृद्धदारकः ।
इति राजनिर्घण्टः ॥
वृषचक्रं, क्ली, (वृषाकारं चक्रम् ।) कृषिकर्म्मोक्त-
वृषाकारचक्रम् । यथा,—
"वृषचक्रं वृषाकारं सर्व्वावयवसंयुतम् ।
लिखित्वा विन्यसेद्भानि वृषनामर्क्षपूर्व्वकम् ॥
मुखादिकर्णशीर्षेषु शृङ्गे स्कन्धे द्विकं द्विकम् ।
त्रीणि पृष्ठे द्वयं पुच्छेऽष्टौ पादे तूदरे त्रिकम् ॥
चलप्रवाहवीथीभिप्रारम्भादिदिनर्क्षकम् ।
यदङ्गेषु स्थितं तस्मात्तस्मिन् सर्व्वं शुभाशुभम् ॥
आस्ये हानिः सुखं नेत्रे कर्णे भिक्षाटनं तथा ।
शीर्षे धृतिस्तथा शृङ्गे सौख्यं स्कन्धे च मङ्गलम् ॥
पृष्ठे कष्टं शुभं पुच्छे भ्रमः पादे सुखं हृदि ।
चन्द्रयोगादिदं प्रोक्तं वृषचक्रं फलं बुधैः ॥"
इति ज्योतिस्तत्त्वम् ॥
वृषणः, पुं, अण्डकोषः । इत्यमरः ॥ तस्य लक्षणं
यथा,—
"स्थूललिङ्गी दरिद्रः स्याद्दुःखैकवृषणो भवेत् ।
विषमे स्त्रीचपलो वै नृपः स्याद्वृषणे समे ।
प्रलम्बवृषणोऽल्पायुर्निर्द्धनो मणिभिर्भवेत् ॥"
अपि च ।
"जलान्त एकवृषणो वृषणाभ्यां चलः स्त्रियाम् ।